चतुर्थः पाठः

# यशोधनानां हि यशो गरीयः

कृषिप्रधानाय भारतदेशाय गोः महत्त्वं सुविदितम् एव। इदम् एव कारणम् अस्ति यत् भारतीयसाहित्ये संस्कृत्यां च सर्वत्र गोः महत्त्वं प्रतिपादितं वर्तते। प्राचीनकाले राजानः गवां रक्षणार्थम् आत्मनः प्राणोत्सर्गम् अपि कर्तुं तत्पराः भवन्ति स्म। महाकविकालिदासेन एतस्य उदाहरणं महाकाव्ये रघुवंशे सम्यक् प्रतिपादितम्।

अयोध्यायाः महाराजः दिलीपः गुरोः वसिष्ठस्य आदेशेन आश्रमे एव स्थित्वा 'नन्दिनी' नाम्न्याः धेन्वाः सेवाम् अकरोत्। तस्याः रक्षणार्थम् आत्मनः प्राणान् अपि त्यक्तुम् उद्यतः जातः। सा एव घटना अत्र नाटकरूपेण प्रस्तुतीकृता वर्तते। पठामस्तावत् एकाङ्किनाटकम् - यशोधनानां हि यशो गरीयः।



**स्थानम्** = घनं वनम्
**समयः** = मध्याह्नवेला

(नन्दिनीम् अनुगच्छन् दिलीपः प्रविशति ।)

**दिलीपः** (आत्मगतम्) अहो प्रकृत्याः सौन्दर्यं विलक्षणम् । एषा कलकलनिनादिनी भागीरथी द्रुतवेगेन प्रवहति । पुरतः हिमाच्छन्नः गिरिराजः । कुसुमैः समृद्धाः तरवः पक्षिणां कलरवैः चित्तं हरन्ति ।

(नेपथ्ये सिंहगर्जना भवति ।)

अये, सिंहः प्राप्तः । (आशङ्कां नाटयन्)

अत्र नन्दिनी न दृश्यते । कुत्र नु गता भवेत् ? पश्यामि एनाम् । (त्वरितं परिक्रम्य)हा धिक् सिंहेन आक्रान्ता नन्दिनी क्रन्दति । रक्षामि एनाम् । (धनुः उद्यम्य) (आकाशभाषितम्) तिष्ठ रे तिष्ठ दुरात्मन् । आर्तानां परित्राणम् इक्ष्वाकूणां कुलव्रतम् । त्वां दण्डयितुम् एषः दिलीपः समुपस्थितः ।

किं वदसि ? मया रुचिकरं भोजनं प्राप्तम् इति । नैव, नैव । त्वां हत्वा गां रक्षामि । (निषङ्गात् शरं निष्कासयितुम् इच्छति ।) (आत्मगतम्) अये ! किमिदं जातम् ? मम हस्तः शरे सक्तः जातः । हा ! बलं प्रयुज्य अपि हस्तं मोचयितुं न प्रभवामि । अधुना किं करोमि ? कथम् एनां रक्षामि ?

**सिंहः** (मनुष्यवाचा) हा हा हा, मां हन्तुम् इच्छसि ? पश्य, तव शक्तिः मया प्रतिरुद्धा । वायुवेगः पादपान् उन्मूलयितुं शक्नोति, न तु पर्वतान् । जानासि किं, कोऽहम् ?

**दिलीपः** कथं न जानामि । त्वं दुष्टः आततायी च ।

**सिंहः** राजन् ! श्रूयतां तावत् । भगवता शङ्करेण एतस्य वनस्य रक्षार्थं नियुक्तः किङ्करोऽस्मि । मम नाम कुम्भोदरः । अद्य सौभाग्यात् मम व्रतस्य पारणायै एषा धेनुः स्वयम् उपस्थिता ।

**दिलीपः** हे मृगराज ! भगवान् शिवः ममापि आराधनीयः देवः किन्तु भवान् एतां हन्तुं न अर्हति । एषा मम गुरोः वसिष्ठस्य होमधेनुः । संसारे मनसाऽपि कश्चित् अस्याः अनिष्टं कर्तुं न शक्नोति । भवता तु रुद्रौजसा अस्यां प्रहारः कृतः ।

**सिंहः** किं तेन । यदि अस्याः विनाशेन गुरुः क्रुद्धः भवति, तर्हि अन्याः कोटिशः गाः प्रदाय तं तोषयितुम् अर्हति भवान् ।

**दिलीपः** नैतत् शक्यम् ! त्वं मम शरीरेण क्षुधां शमय गां च परिमुञ्च ।

**सिंहः** किमेवम्। एकस्याः धेनोः कृते प्राणान् अपि दातुम् उद्यतोऽसि ! शृणु राजन् !

*एकातपत्रं जगतः प्रभुत्वम्*
*नवं वयः कान्तमिदं वपुश्च ।*
*अल्पस्य हेतोः बहु हातुमिच्छन्*
*विचारमूढः प्रतिभासि मे त्वम् ॥*

**दिलीपः** अहं मूढो वा बुधो वा– एतत् परिहाय धेनुं मुञ्चतु भवान्।

**सिंहः** राजन् ! त्वां न हन्तुम् इच्छामि। त्वं तु अहिंस्यः।

**दिलीपः** *किमप्यहिंस्यस्तव चेन्मतोऽहं,*
*यशःशरीरे भव मे दयालुः ।*
*एकान्तविध्वंसिषु मद्विधानां ,*
*पिण्डेष्वनास्था खलु भौतिकेषु ॥*

**सिंहः** तथास्तु ! अद्याहं तव देहेन क्षुधां शमयामि, गां च मुञ्चामि।

**दिलीपः** अनुगृहीतः अस्मि ! आत्मकृत्यं सम्पादय।

(नृपः दिलीपः भूमौ अधोमुखः तिष्ठति, सहसा आकाशात् तस्मिन् पुष्पवृष्टिः भवति।)

**नन्दिनी** वत्स ! उत्तिष्ठ, प्रसन्नाऽस्मि ते !

**दिलीपः** (उत्थाय) मातः ! क्वासौ सिंहः ? सः न दृश्यते।

**नन्दिनी** (सस्नेहम्) पुत्र ! सः तु मायासिंहः आसीत्, तव भक्तिं परीक्षितुं मयैव प्रकटीकृतः। नूनं तव भक्तिः अपूर्वा। त्वं सफलकामः भूत्वा चक्रवर्तिनं पुत्रम् आप्नुहि।

**दिलीपः** अनुगृहीतः अस्मि ! भवत्याः आशीर्वचनेन लब्धं मया सर्वम्।

(उभौ आश्रमं प्रति परिक्रामतः)

**पटाक्षेपः**

## अनुप्रयोगः

1. **अधोलिखितानां पदानां शुद्धम् उच्चारणं कुरुत -**

| | | | |
|---|---|---|---|
| क. | प्रकृत्याः | ख. | हिमाच्छन्नः |
| ग. | कुलव्रतम् | घ. | निष्कासयितुम् |
| ङ | कोऽहम् | च. | रुद्रौजसा |
| छ. | किमप्यहिंस्यस्तव | ज. | पिण्डेष्वनास्था |

2. **प्रसङ्गानुसारं तं तं भावं प्रदर्शयन्तः अभिनयं कुरुत -**

क. (आकाशभाषितम्) तिष्ठ रे तिष्ठ दुरात्मन्। आर्तानां परित्राणाय इक्ष्वाकूनां कुलव्रतम्। त्वां दण्डयितुम् एषः दिलीपः समुपस्थितः।

ख. सिंहः– (मनुष्यवाचा) हा हा हा, मां हन्तुम् इच्छसि। पश्य, मया तव शक्तिः प्रतिरुद्धा। जानासि किं, कोऽहम् ?

ग. अहं मूढो वा बुधो वा–एतत् परिहाय धेनुं मुञ्चतु भवान्, इमां रक्षितुं देहार्पणाय तत्परोऽहम्।

घ. तथास्तु ! अद्याहं तव देहेन क्षुधां शमयामि गां च मुञ्चामि।

ङ (सस्नेहम्) पुत्र ! नूनं तव भक्तिः अपूर्वा। त्वं सफलकामः भूत्वा चक्रवर्तिनं पुत्रम् आप्नुहि।

3. **अधः समस्तपदानां विग्रहाः दत्ताः। पाठात् विचित्य विग्रहस्य समक्षं समुचितं समस्तपदं लिखत -**

| | *विग्रहः* | *समस्तपदम्* |
|---|---|---|
| क. | हिमेन आच्छन्नः | ............................................... |
| ख. | गिरीणां राजा | ............................................... |
| ग. | विचारे मूढः | ............................................... |
| घ. | द्रुतः वेगः तेन | ............................................... |

ङ अधः मुखं यस्य सः ..................................................

च. स्नेहेन सह ..................................................

छ. सफलाः कामाः यस्य सः ..................................................

## 4. अधोलिखितानां समानार्थकानि पदानि पाठात् चित्वा लिखत –

| | *पदानि* | *समानार्थकानि पदानि* |
|---|---|---|
| क. | गङ्गा | .................................................. |
| ख. | अग्रे | .................................................. |
| ग. | हिमालयः | .................................................. |
| घ. | पुष्पैः | .................................................. |
| ङ | महीरुहाः | .................................................. |
| च. | केसरी | .................................................. |
| छ. | खगानाम् | .................................................. |
| ज. | पृथिव्याम् | .................................................. |

## 5. निर्देशानुसारं शुद्धं क्रियारूपं लिखत –

(क) राजन् ! त्वं कथं मां .............................. । (हन्, लृट्)

(ख) अहं धेनुं .............................. । ( मुच्, लट्)

(ग) वत्स ! प्रसन्ना अस्मि ते । .............................. । (उत् + स्था, लोट्)

(घ) एकस्याः धेनोः कृते प्राणान् अपि दातुम् उद्यतः .............................. । (अस्, लट्)

(ङ) अहं तव देहेन क्षुधां .............................. । (शम् + णिच् , लट्)

## 6. समुचितैः क्तान्तविशेषणपदैः रिक्तस्थानपूर्तिः क्रियताम् –

(क) पुरतः .............................. गिरिराजः ।

(ख) सिंहेन .............................. नन्दिनी क्रन्दति ।

(ग) मम हस्तः शरे .............................. जातः।

(घ) अस्याः विनाशेन गुरुः .............................. भवति।

(ङ) एतस्य वनस्य रक्षार्थं .............................. अहं शङ्करस्य किङ्करोऽस्मि।

**7. अधः कानिचित् कथनानि चारित्रिकमूल्ययुक्तानि। मञ्जूषायाः तं तं भावं विचित्य कथनानां समक्षं लिखत -**

***भावः***

| | | |
|---|---|---|
| क. | त्वां दण्डयितुम् एषः दिलीपः समुपस्थितः। | (........................) |
| ख. | अत्र नन्दिनी न दृश्यते। कुत्र नु गता भवेत्। | (........................) |
| ग. | अल्पस्य हेतोः बहु हातुम् इच्छन् विचारमूढः प्रतिभासि मे त्वम्। | (........................) |
| घ. | यशः शरीरे भव मे दयालुः। | (........................) |
| ङ | वत्स ! उत्तिष्ठ ! प्रसन्नास्मि ते। | (........................) |
| च. | त्वं सफलकामः भूत्वा चक्रवर्तिनं पुत्रम् आप्नुहि। | (........................) |
| छ. | भवत्याः आशीर्वचनेन लब्धं मया सर्वम्। | (........................) |
| ज. | अग्रे स्थितम् अपि अपराधिनं दण्डयितुं न शक्नोमि। | (........................) |

**मञ्जूषा**

आशीर्वादः, दीनता, उत्साहः, स्नेहः,

निवेदनम्, कृतज्ञता, भर्त्सना, आशङ्का।

## 8. अधोलिखितं कथनं कः/का कं/कां प्रति कथयति ?

| | | कः/का | कं/कां प्रति |
|---|---|---|---|
| क. | कथं न जानामि त्वं दुष्टः आततायी च। | ...................... | ...................... |
| ख. | अस्याः विनाशेन कुपिताय गुरवे कोटिशः गाः दत्त्वा तं प्रसादयतु। | ...................... | ...................... |
| ग. | क्वासौ सिंहः ? सः न दृश्यते। | ...................... | ...................... |
| घ. | सः तु मायासिंहः आसीत्। | ...................... | ...................... |
| ङ. | एषा कलकलनिनादिनी भागीरथी द्रुतवेगेन प्रवहति। | ...................... | ...................... |

## 9. अधः दत्तासु सूक्तिषु ताः चिनुत याः पाठे न सन्ति -

क. अल्पस्य हेतोः बहु हातुम् इच्छसि।

ख. यशः शरीरे भव मे दयालुः।

ग. उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम्।

घ. क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।

ङ एकातपत्रं जगतः प्रभुत्वम्।

च. वायुवेगः पादपानाम् उन्मूलने समर्थः भवति न तु पर्वतानाम्।

छ. प्रजाः प्रजानाथ पितेव पासि।

ज. क्षमा-शस्त्रं करे यस्य दुर्जनः किं करिष्यति ?

## 10. अन्वयं पूरयत -

क. एकातपत्रं .............................. प्रभुत्वं नवं वयः। इदं कान्तं .................. च। अल्पस्य हेतोः ...................... हातुम् इच्छन् त्वं मे विचारमूढः .............................. ।

ख. अहं चेत् तव किम् अपि ........................................ मे ............................... दयालुः भव। मद्विधानां ........................ भौतिकेषु पिण्डेषु ..........................अनास्था (भवति)।

**11. घटनाक्रमानुसारं कथां पुनः लिखत -**

क. सः मायासिंहः धेन्वा एव प्रकटीकृतः आसीत् ।

ख. दिलीपः धनुः उत्थाय बाणेन सिंहं हन्तुम् इच्छति ।

ग. दिलीपः वने प्रकृत्याः सौन्दर्यं पश्यति ।

घ. विवशतां गतः राजा स्वशरीरं दत्त्वा गां रक्षितुम् इच्छति ।

ङ राज्ञा सिंहगर्जना श्रूयते ।

च. दिलीपस्य भक्तिं दृष्ट्वा नन्दिनी प्रसीदति तस्मै च पुत्रप्राप्त्यै आशीर्वादं यच्छति ।

छ. नृपः सिंहेन आक्रान्तां धेनुम् अवलोकयति ।

ज. दिलीपस्य हस्तः शरे सक्तः जायते ।

## पाठ-विकासः

अस्य नाट्यांशस्य कथावस्तु रघुवंशात् संगृहीतम् । रघुवंशः महाकवेः कालिदासस्य श्रेष्ठतमा रचना । राजा दिलीपः तस्य पत्नी सुदक्षिणा च सन्ततेः अभावात् दुःखिनौ भूत्वा ऋषेः वसिष्ठस्य आश्रमं गतवन्तौ । मुनिः उक्तवान् राजन् ! त्वम् अत्र वने स्थित्वा कामधेनोः सुतायाः नन्दिन्याः सेवां कुरु । सेवया प्रसन्ना सा तव मनोरथं पूरयिष्यति इति । राजा दिलीपः सपत्नीकः धेनोः सेवां करोति, तस्याः कृते प्राणान् अपि त्यक्तुं तत्परः भवति । सर्वेषां प्राणिनां कृते आदर्शः सम्मानभावः सेवाभावः च अत्र प्रदर्शितः । कालिदासस्य सम्पूर्णं साहित्यं प्रकृतिप्रेमपरिपूर्णं, प्रेरणाप्रदं, शिक्षाप्रदम् च ।

अनेन महाकविना 'कुमारसम्भवम्' 'रघुवंशम्', इति द्वे महाकाव्ये, ऋतुसंहारः मेघदूतम् च इति द्वे गीतिकाव्ये, 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्', अभिज्ञानशाकुन्तलम् च इति त्रीणि नाटकानि रचितानि । 'अभिज्ञानशाकुन्तलम्' तु विश्वप्रसिद्धम् अस्ति ।

अस्य महाकवेः सम्पूर्णसाहित्यस्य आधारः आध्यात्मिकता अस्ति । सर्वत्र प्रकृतिवर्णनम् अत्यद्भुतं मनोहारि च । 'उपमा' पाठकस्य मनः मोहयति । भ्रातृत्वम् अत्र आदर्शः, सेवा च परमं लक्ष्यम् ।

- आत्मगतम्

- आकाशभाषितम्